No. ४५७७

Title नीलोद्वाहविधिः नीलपद्धतिर्वा

Author — *

Extent १४ पत्राणि Age सं. १७५२

Subject धर्मशास्त्रम्

नीलोद्धारविधिः नीलपद्धतिर्वा

५५७७

नीलोद्धाहः

॥नीलोद्वाहविधिः॥प्रातःसंध्यानंतरंयजमानस्यस्नानमध्याह्नसं
ध्यातर्पणंदेवपूजा॥वैश्वदेवः॥लिखितप्रत्यंगगणेशपूजनं।ततोमा
तृस्थापनार्थेउपविश्य॥आचमनं।प्राणायामः।प्रयोगः।अद्यश्री
म०कलियुगप्रथमविभागेश्रीमन्नृपविक्रमार्कस्समयतःसंवत्स
राणां आषाढादि।अमुकसंवत्सरेअयनगतेश्रीसूर्येऋतौमासे
पक्षेतिथौवासरेनक्षत्रेयोगेकरणेचंद्रेसवितरिदेवगुरौ।शेषे०
षुग्रहेषु।एवंगु०कालेजंबूद्वीपेमहानद्याःश्रीतपत्याःदक्षिणतटे।अ
स्मिन्पुण्यमंडपायतनेदेव०धौ।एवं०देशेचाममपूर्वोपयाचि
तनीलोद्वाहकर्मणिअधिकारप्राप्त्यर्थंआत्मशुध्यर्थंप्राजा

१

पत्यत्रयसंकल्पपूर्वकं। नीलोद्वाहकर्मप्रारंभनिमित्तं गणेशांबिकयोः
प्रीत्यर्थं आदित्यादिनवग्रहाणां प्रीत्यर्थं अदित्यादिनवग्रहाणां अनुक्र
३ ग मत्वार्थं ब्राह्मणभोजनसंकल्पपूर्वकं गणेशगौर्यादिमातृणां वसोर्द्धारा
सहितानां स्थापनपूजनप्रतिष्ठामहं करिष्ये। पुण्याहं दीर्घ०। शि
वा आपः०। इत्यादि सुशांतिर्भवतु। दक्षिणासहितान् गृहीत्वा मम यद्वो
पयोचितं नीलोद्वाहकर्मणि अधिकारप्राप्त्यर्थं आत्मशुद्ध्यर्थं प्रा
जापत्यत्रयप्रत्याम्नाये तु प्राजापत्यं द्वादश द्वादश ब्राह्मणपरि
गणनया षट्त्रिंशद्ब्राह्मणान् अहं तर्पयिष्ये। भगवान् श्रीमहावि
ष्णुः प्रीयतां। करसंपुटं कृत्वा॥ अनेन प्राजापत्याचरणेन मम

देहशुद्धिरस्तु। नीलोद्वाहकर्मण्यधिकारश्चास्तिरस्तु। ततो ब्राह्मणेनो
जनसंकल्पः। दत्तान्हितान् गृहीत्वा। ममनीलोद्वाहदर्शनं निमित्तं ग
णेशांबिकयोः प्रीत्यर्थं आदित्यादि० प्रीत्यर्थं आदित्याश्च दि० अनु
कूलत्वार्थं यथासंपन्नोनान्नेन तृप्तिपर्यंतेन भोजनेन एकादशै
ब्राह्मणान् अहं तर्पयिष्ये। भगवत्यौ गणेशांबिके आदित्यादिनव
ग्रहाश्च प्रीयंतां। ततो मातृस्थापनं। ॐ श्री महागणपतिं स्थापयामि।
गौरीं स्थापयामि० इत्यादि। गोत्रदेव्यादेवतापर्यंत। प्रतिष्ठा गणे
शगौर्यादिमातरः सुप्रतिष्ठिता वरदा भवंतु। गणेशगौर्यादिमातृ
भ्यः इदमन्नं। चंदनं। कुंकुमं। पुष्पाणि। धूपदीपौ पाद्यादि अर्घ्यं नैवेद्यं। २

तांबूलं। अत्र चंदनगंधपुष्पधूपदीपनैवेद्यानि यथाकृतानि गणेशगौर्यादिमातरो वः स्वाहा। नमस्कारः। ततो वसोर्द्धाराः उत्तरे कुड्येपूर्वकुड्ये वा॥

प्रतिष्ठा। वसोर्धाराः सुप्रतिष्ठिता वरदा भवंतु। वसोर्द्धाराभ्यः इदमत्र चंदनं इत्यादि। नैवेद्यं। अत्र चंदनगंध० नैवेद्यानि यथाकृतानि वसोर्द्धाराभ्यो वः स्वाहा॥ नमः। ततो वृद्धिश्राद्धं। ततः कर्मप्रारंभः। ईशानेपद्मकलशस्थापनं। ध्रुवबर्हिर्ब्रह्मादि सर्वं॥ तथा विवाहसंबंधि सर्वं मधुपर्कः। शूर्पस्थाः शमीपत्रमिश्रिता लाजाः। दर्वी। पीतवस्त्रवीरिका। दृषदुपले। शमीगर्भाश्वत्थक॥ इत्यादि। आचमनं प्राणायामः॥ अद्यश्री० देशेच॥ यजमानस्य शास्त्रोक्त० र्थं पूर्वोपयाचितनीलो द्वाहक

र्माहं कर्मेद्धिं करिष्ये॥ ॐ स्वस्ति नो मिमीता० पंगमेमहि। पवित्रसंस्का
रः। अग्निं प्रणयामि० दे। परिसमूहनं। आघारकं। इत्यादि। सवितुष्प्रा
प्रसव इत्याज्यसंस्कारः। सवितुर्वः प्रसव इति स्रुवमध्ये उदकसंस्का
रं तं कृत्वा॥ हविर्ग्रहणं। पिष्टमयश्चरुः। ॐ युक्ष्मे जुष्टं गृह्णामि ३। चतुर्थं
तृल्वी। आसादयामि। युक्ष्मे त्वा जुष्टं प्रो०। समिदादिकं०। शेषोद
कं प्रणीतासु। चरोः आलोडनं। अधिश्रयणं। वृषभार्थ स्थापनं। नंदां
स्थापयामि। सुमनसां०। सुनंदां०। सुशीलां०। सुरभीं०। वृषभार्थ
थः इदमत्र। चंदनपुष्पादि। चरोः शृतानि घारणं। उद्वासनं। पार्श्व०। ३
प्रत्यभिघा०। सप्तदशास मिधा०। विष्णोर्हं०। त्वमग्ने०। यस्येमे०। अ

ग्नये० उत्तरतः। सोमाय० दक्षिणतः। मध्ये न्याकृतयः। स्वस्तिवाचनं।

ब्राह्मणानां हस्ते पुण्याहं दीर्घमित्यादिसुशांतिर्भवतु॥ अस्य नील

विवाहांगस्य स्वस्तिवाचनकर्मणः प्रतिष्ठासिद्ध्यर्थं हिरण्य० यांस्व

स्तिवाचकब्रा० न्यो० दे॥ यो यस्य विभागः०॥ दक्षिणाः पांतु० स्वस्ति

भवंतो० ब्राह्मणानां हस्ते। अस्य नीलविवाहांगस्य स्वस्तिवाचनकर्मणो

यं न्यूनातिरिक्तं० गणेशांबिकौ कयो:० स्वस्ति स्तिवाचकब्राह्मणानां

प्र० परिपूर्णमस्तु॥ गृह्ये० उत्तरेण ततः मंडपमध्ये वृषवत्सतरीः

णां आनयनेत्थ ते आज्याकृतीर्जुहोति ॐ इह रतिरिह रमध्वं स्वाहा।

ॐ इह धृतिरिह स्वधृतिः स्वाहा। ॐ उपसृजं धरुणं मात्रे धरुणो मा

तरंधयन्तारायस्पोषमस्मासुदीधरत्स्वाहा॥ततश्चरोः चतुर्गृहीतंकृत्वा॥
भरद्वाजः पूषागायत्री॥ॐपूषागा अन्वेतुनः पूषारक्षत्वर्वतः॥पूषा
उनः वाजंसनोतुस्वाहा॥ रुद्रकलशस्थापनसंस्कारः॥स्योनापृथिवि०। अभि
क्रंदन्०। आघ्रणोत्रि(?)स्य०। भूर्भुवःस्वः॥या ओषधी०। अश्वत्थेवो०। आयु
ष्यंवर्चस्यं०। युवंवस्त्राणि०। इदंतेपात्रं०। याः फलिनी०। कलशेरुद्रस्
क्त४जपः॥ इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधाम्ने। अषाढायसहमानायवेधसेतिग्मायुधायभरताशृणोतुनः॥~~इमारुद्रायस्थिरधन्वनेकम~~कद्रुद्रायप्रचेतसेवर्ग२इमारु
द्रायतवसेवर्ग२आतेपितर्मरुतांवर्ग३इमारुद्रायास्थिरधन्वनेवर्ग१
त्र्यंबकंऋच१इतिजपः॥ ततोवृषवत्सतरीणांवस्त्रकुंकुमपुष्पकुंदपु ४
ष्पमालाघंटाद्याभरणैः अलंकरणं॥वृषस्यकंठेयज्ञोपवीतंपरिधा

था। वृषपदबंधनं। प्रथमं दक्षिणजघने त्रिशूलं कुंकुमेन कुर्यात्। ॐ नुव
नमसि स्महस्रपोषमिंद्राय त्वाश्नवोददत्। अच्छतमस्यरिष्टमिलान्नंगो
पायनं यावतीनामिदं करिष्यामि तु यस्त्रीनामुत्तमांसामां क्रियास्त्रीऽइ
तिमंत्रेण। वामजघने चक्रं पूर्वोक्तमंत्रेण। सर्वेषां मदनफलबंधनं।
कुंकुमादितिलककरणं। ततो रुद्रकलशात् उदकं पात्रांतरे उद्धृत्य।
तेन वृषवत्सतरीणां अभिषेकः॥ अभिषेकमंत्राः॥ आपोहिष्ठा ३
च ३ अथवा १०। उदुत्तमं वरुण ९ इमं मे वरुण १ कयानश्चित्र वर्ग ३॥
यजुर्वेदोक्ताः यद्देवादेवहेडनं ऋक ३। श्रीसूक्तं हिरण्यवर्णां वर्ग ३।
हिरण्यवर्णाः शुचयः पावकाः इत्यादि आथर्वणमंत्राः समुद्रज्येष्ठाव
ज १

यात्र्षधीःसर्वाजातावर्ग४।सहस्राङ्गंशतधारंश्लोक३इत्यभिषेकः॥
ततोन्यासः।तीक्ष्णशृंगायविद्महेवेदपादायधीमहितन्नोवृषभप्रचोद
यात्।ततःपूजा॥भगवतेनीलवृषायइदमत्रचंदनपुष्पादि।अर्घः॥
धर्मस्त्वंवृषरूपेणजगदानंदकारक।अष्टमूर्त्तेरधिष्ठानमतःपाहि
सनातन॥वृषोहिभगवान्धर्मश्चतुष्पादःप्रकीर्त्तितः।नमामितम
हंभक्त्यासमांरक्षतुसर्वतः॥वत्सतरीपूजा॥गावोममाग्रतःसंतुगा
वोमेसंतुपृष्ठतः।गावोमेहृदयःसंतुगवांमध्येवसाम्यहं।अत्रचं
दनादि।अर्घः।पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ।तासांम
ध्येतुयानंदातस्यैधेन्वैनमोनमः॥मधुपर्कः॥साधुभवानास्तामर्च 5

×२ विकृतामिव स्तर्यः इदं तमधितिष्ठामि योऽस्मान् द्वेष्टि

×विराजो दोहोऽसि विराजो दोहमशीय मयि पद्यायै विराजो दोहः २

यिष्यामोऽन्नवंतं। अर्चय। कुर्वः ३ प्रतिगृह्यतां ३ प्रतिगृह्णामि। अर्ह

वर्ष्मास्मि समानानां०। पाद्यं ३। प्रति०। विराजो दो०। अर्घ्य०। आचमनी

य०। आपो दिष्टान्नव ३ मधुपर्को ३। प्रति०। उद्घाटनं। मित्रस्य त्वा०॥

देवस्य त्वा० यशसे ब्रह्मवर्चसाय। आचार्यो गृहीत्वा उद्धाद्य। सव्येपा

णौ कृत्वा। पूर्वस्यां। वसवस्त्वा॥ दक्षिणस्यां पितरस्त्वा०॥ पश्चिमस्यां॥

आदित्यास्त्वा०॥ उत्तरस्यां॥ रुद्रास्त्वा द्र०। ऊर्ध्वं विश्वे त्वा देवाः प्र०।

भूः। भुवः। स्वः। प्राशनं। भूर्भुवः स्वः सर्वप्राशनं। शंनो देवी रु० हृ

दयस्पर्शः। उदको० प्राणापा सि०। चक्षु०। श्रोत्र०। इंद्रस्य त्वा०। अनु

नो माधृष्टु तन्वा यद्धि क्लिष्टं। गो गौ गौः॥ माता रुद्राणां०॥ मुक्तेज

। मित्रस्य त्वा चक्षुषा प्रतीक्षे। देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पू

ष्णो हस्ताभ्यां प्रतिगृह्णामि॥ २

तत्र गणां सुस्त्विन्यत्तु ॥ संकल्पः । पुण्याहं दीर्घ॰ शिवा॰ सौ॰ । अ॰ दी॰ पु॰ वृ॰ धृ॰ इ॰
अ॰ य॰ ह्रि॰ । दर्भान् गृहीत्वा ॥ अस्मिन्मधुपर्ककर्मणि कांस्यपात्रद्वयेतां
म्रपात्रत्रयंरुद्ररूपायनीलवृषायतुभ्यं॰ददे ॥ अस्य मधुपर्ककर्मणो
॰ नीलवृषप्रसादा॰ स्तु ॥ इहे॰ त्रा उ॰ स्तु ॥ कन्यादानं वत्सतरीक
न्यादाननिमित्तं नीलवृष एतत्ते पाद्यं ॥ एष तेऽर्घः ॥ पूजा । स्वस्ति न
इन्द्रो॰ । पादप्रक्षालनं वत्सतर्याश्च ॥ आचमनं प्राणायामः । उ स्वस्ति
नो मिमीता॰ सं गमेमहि ॥ श्रीगणेशाय नमः । उ । अपवित्रः पवित्रो वा॰ ॥
सप्तव्याधा दशार्णेषु॰ वत्सतरीकन्यादानोपहारणे॰ । उं भूः उं भुव॰ उ ६
पास्मै॰ मधु॰ उ अद्याद्य अमुकपुण्यतिथौ शास्त्रोक्त॰ फलप्राप्तये पया । चित

नीलोद्वाहकर्मणि वत्सतरीकन्यादानमहं करिष्ये ॥ अत्र चंदनादिपूजा ॥
यथादत्तं॰ रुद्ररूपिणे नीलवृषाय तुभ्यं॰ ददे ॥ इमानि अर्चितानि ज्योनी
षि ॥ अर्चनविधं॰ स्तु ॥ आचमनं ॥ अहून्नमी॰ री ॥ यथादास्यमानं गवां क्ति के ६
रुद्ररूपिणे नीलवृषाय ते स्वाहा ॥ ॐ पुण्याहं दीर्घं॰ स्तु ॥ नीलखुरे ॥ शिवा
आपः॰ तु ॥ सौ॰ स्तु ॥ अक्षतं॰ स्तु ॥ दीर्घमायुरस्तु॰ स्वशां निर्वर्त्तु ॥ दत्तां हृता
न्गृहीत्वा ॥ शमीपत्राणि च ॥ अद्यश्री॰ पुण्यदेशे च ॥ मम ॥ पूर्वोपयाचितनी
लोद्वाहकर्मणि ॥ इमाश्चतस्रो वत्सतरीः रुद्रदैवताः सालोक्यसारूप्यसान्नि
ध्यसायुज्यलक्षणचतुर्विधमुक्तिरूपाः अस्पृष्टमैथुनाः गर्भधारणयोग्याः
स्वर्णशृंगादियथाशक्त्यलंकृताः गंधाद्यर्चिताः शास्त्रोक्त॰ र्थं ममस्तत्पूर्व

दद्यात्सोम्नतत्वमश्रीय। गोदेत्र एधि मयो मर्त्यं प्रतिगृह्णते। कोदात्कस्मादात्। कौ मोदात्का
मायादात्। कामोदात। कामव्नति टइ। ता कामेत तेर

ज्ञानां रुद्र लोकावाप्त्यर्थं अमुकपर्वणि रुद्ररूपिणे नील वृषाय तुभ्य
महं संप्रददे॥ मयादत्ता इतिपत्नी॥ रुद्रायत्वा मह्यं वरुणो ॥ गोदेत्र ए
धि॥ कोदात् तत्॥ इति आचार्यः॥ अस्य वत्सतरी कन्यादानकर्मणः
प्रतिष्ठासिद्ध्यर्थं हिरण्य दक्षिणां द्रव्यं रुद्ररूपाय नील वृषाय तुभ्य
महं ददे॥ अस्य वत्सतरी कन्यादान कर्मणः प्रतिष्ठासिद्ध्यर्थं न्यूनाति
तिरिक्त परिहारार्थं यथोत्साहां भूयसीं दद्यात् नानागोत्रेभ्यो दक्षिणाः
पांतु स्वस्ति भवंतो ब्रुवंतु। स्वस्ति ३॥ अस्य वत्सतरी कन्याप्रदानक
र्मणो यं न्यूनातिरिक्तं तत्सर्वं भवतां प्रसादात् नील वृषप्रसादात् ७
परिपूर्णमस्तु। अस्तु ३॥ यजमानः पत्नीच नमस्कारं कुर्यात्। ततः

कौतुकमंत्रान् आचार्यःपठेत्॥रैभ्यासी १ चित्तिरा २ समंजंतु ३ यथेयं
शचींवावा ०४ रूपंरूपं ०५ नीललोहितं ०६ मधुमतीरोषधी ०७ ततःवेदि
कांप्रदक्षिणीकृत्य अथैवसनरीष्टछेद्वृषंचसहैव अग्निसमीपे आनीय।
अश्वारब्धायांमहाव्याहृतिभिस्तिस्रोजुहोति।मूर्द्धिहोमंदाकुर्यात्।
ॐसम्राज्ञीश्वशुरेभव ०८ देवृषुस्वाहा॥ततोविवाहकर्मप्रकृतिवत्॥
ॐगृभ्णामिते ०९ इत्यादिसप्तपदीपर्यंतंलाजाहोमंयजमानएवकरोति।
इयंनारीत्यादिमंत्रान् आचार्यःपठति।सूर्यपाठः॥सप्तपदीकरणं
ते।ॐविष्णुस्त्वानयतु॥ आपोहिष्ठीयाभिस्तिसृभिरभिषेकः।पुण्याहं
दीर्घं० सुशांतिर्भवतु। अस्यनीलवृषोद्वाहकर्मणःप्रतिष्ठासिद्ध्य

र्थं गां दक्षिणां आचार्याय तुभ्यमहं संप्रददे॥ अस्य कर्मणः समृद्ध्यर्थं वा
धूपवस्त्रनिष्क्रयेयथा० द्रव्यं सूर्यपाकं ब्राह्मणेभ्यो० ददे। ततः तर्पणं॥
आसादनं कृत्वा। आचमनं। प्राणायामः॥ अद्याद्य० र्थं देवर्षिवस्न्तरी
क्षेतर्पणमहं करिष्ये॥ प्रथमं स्वगृह्योक्तं। ॐ अग्निस्तृप्यतु। वायुस्तृप्यतु।
इत्यादि॥ स्थावरजंगमानि सर्वभूतानि तृप्यन्तु॥ इत्येतत्पर्यन्तं कृत्वा
ततः पुराणोक्तश्लोकैः सव्येन॥ ॐ ब्रह्माद्या देवताः सर्वा ऋषयो मु
नयस्तथा। असुरा देवपत्न्यश्च मातरश्चण्डिकास्तथा। दिक्पाला लो
कपालाश्च ग्रहा देवाधिदेवस्थिताः। ते सर्वे तृप्तिमायान्तु नीलपु ८
क्षेषु तर्पिताः॥ १ विश्वेदेवास्तथादित्याः साध्याश्चैव मरुद्गणाः॥ हेत्र

पीगेपपीगनिनदानद्दुष्टश्मागराः ।। पातालेनागपन्न्यश्चनागाश्चैवसपर्व
ताः। पिशाचागुह्यकाःप्रेतागणगंधर्वराक्षसाः ।। तेसर्वेद्दष्टिमायांतुनीलपु
छेषुतर्पिताः ।। पृथिव्यापश्चतेजश्चवायुराकाशमेवच। दिविभुव्यंतरि
क्षेचपातालेतलवासिनः। तेसर्वे० ताः।३। शिवःशिवातथाविष्णुःसिद्धि
र्लक्ष्मीर्लक्ष्मीस्सरस्वती। तपोधनाश्चभगवानव्यक्तःपरमेश्वरः। तेसर्वे० ताः।
४ क्षेत्रौषधिलताद्वक्षावनस्पत्यधिदेवताः। कपिलःशेषनागश्चतक्ष
कोनंतएवच। अन्येजलचराजीवाअसंख्यातास्त्वनेकशः। तेसर्वे० ताः।।
चउर्दशयमाश्चैवयेचान्येयमकिंकराः। सर्वेचपक्षिराजाश्चपक्षिणःप
शवस्तथा। अन्येपिवनजीवायेदिवानिशिविहारिणः। अजागोमहिषी

रूपायेचान्येपशवस्तथा।तेसर्वेतृप्ति०ताः।६स्वेदजोद्भिजऊजाजीवाश्चंडजा
श्चजराय्युजाः।शांतिदाःशुभदास्तेस्युर्नीलपुच्छेषुतर्पिताः॥७॥अपसव्यं॥
स्वगृह्योक्तंप्रथमं॥ईशतर्विनः।माध्यमाःगृत्समदः।इत्यादि।येचान्येआ
चार्यास्तेसर्वेतृप्यंतु॥इतिकृत्वाप्रतिपुरुषंपितरः।पितृपार्वणं।मातृपा
र्वणं।मातामहपार्वणं।मातामहीपार्वणं।सर्वेएकोद्दिष्टाः।अन्येपिस्वपिं
डाः।बंधवःसंबंधिनः।मित्रादयः।ततःपुराश्लोकैः।अपसव्येन।अपस
व्येन।आब्रह्मस्तंबपर्यंतंयेचान्येगोत्रिणस्तथा।तेसर्वे०।१मत्पर्व्याघ्र
हतायेचशृंगिदंष्ट्रिजलाग्निभिः॥अपुत्रियाक्रियायेचअदाराधर्मवर्जि ए
ताः।तेसर्वे०॥आमभगर्भमृतायेचशस्त्रघातमृताश्चये।संस्काररहि

तायेचरौरवादिषुगामिनः॥तेसर्वे०॥आब्रह्मस्तंबपर्यंतंदेवर्षिपितृबांधवाः॥तृ
प्यंतुपितरःसर्वेमातृमातामहादयः॥४॥अतीतकुलकोटीनांसप्तद्वीपनिवा
सिनां॥आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं॥५॥पितृवंशे०तेपिबंधुवंशे
स्मिन्नस्मिन्मयादत्तंनीलपुच्छेतिलोदकं॥६॥येबांधवाअबांधवायेन्यजन्म
निबांधवाः॥तेसर्वेतृप्तिमायांतुनीलपुच्छेतिलोदकैः॥७॥वृक्षत्वंतुगताः
केचित्तृणगुल्मलतास्थितिं॥यातनास्तुचघोरास्तुयामीषुविविधास्तुवः॥
नरकेषुचघोरेषुपतितानांस्वेनकर्मणा॥तेसर्वे०॥८॥देवत्वंमानुषत्वंवाति
र्यक्प्रेतपिशाचतां॥कृमिकीटपतंगत्वंगतायेचस्वकर्मभिः॥तेषामुद्ध
रणार्थायजलमेतद्ददाम्यहं॥९॥आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः

तृप्यंतुपितरःसर्वेमातृमातामहादयः।१०।इतिअपसव्येनसर्वंकृत्वा।ततः
कंम्बंकृत्वा।उंसनकश्चतृप्यतु।इत्यादीनां।सव्येनआब्रह्मस्तंबपर्यंतंज
गतृप्यतु।इतितर्पणं।।ततःपिंडदानं।आचमनंप्राणायामः।ईशानवि
ष्णुकमलासन०।।उंअपवित्रःपवित्रोवा०सप्तव्याधा०दृष्टा०निपाताद्दि
०नीलखुरेपिंडदानोपहाराणांपाकादीनां०।।उंभूः०मधु०३अद्याद्य०
तिथौ।गोत्राणांपितृपितामहप्रपितामहानांअमुकाअमुकाअमुकशर
र्मणां।अगोत्राणांअ०शर्मणांसैकोद्दिष्टानांपुराणश्लोकोक्तसद्दिता
नांशास्त्रोक्त०र्थंनीलखुरेपिंडदानमहंकरिष्ये।।स्तरणंपात्रेजपः।अव १०
नेजनं।।एकोद्दिष्टानांअमुकस्यगोत्रादि।नानागोत्राः।नानासन्निधाना।

नानाशर्माणः॥पुराणश्लोकोक्तसहिताः॥अवनेनिग्ध्वंयेचयुष्मानत्रात्र॥
ततःपिंडाः।पार्वणे४एकोद्दिष्टानांसर्वेषांबंधूनांसुहृदांचकृत्वा॥ततःपु
राणोक्तश्लोकैः॥पितृवंशे०ताः।येम०ऽपिविरूपा० वृक्षयोनिगतायेचति
र्यग्योनिगताश्चये।मुद्गलत्वंगतायेचयेचप्रेतत्वमागताः॥४॥आब्रह्मणोये
पितृवंशजातामातुस्तथावंशभवामदीयाः।वंशद्वयेममदासभूताभृत्या
स्तथैवाश्रितसेवकाश्च॥५॥मित्राणिशिष्याःपशवश्चवृक्षादृष्टाश्चदृष्टा
श्चकृतोपकाराः।जन्मांतरेयेममसंगताश्चतेभ्यःस्वधापिंडमहंद
दामि॥६॥अजातदंतायेकेचिद्गर्भेप्रपीडिताः।तेषामुद्धरणार्थायइमंपि
डंददाम्यहं॥७॥बंधुवर्गाश्चयेकेचिन्नामगोत्राविवर्जिताः।स्वगोत्रेपरगो

न्वेवा तेभ्यः पिंडं ददाम्यहं ॥८॥ अग्निदाहमृताये च सिंहव्याघ्रहताश्चये ॥
दंष्ट्रिभिः शृंगिभिर्वापि तेभ्यः पिंडं० ॥९॥ उद्बंधनमृतायेच विषशस्त्रह
ताश्चये। आत्मोपघातिनो ये च तेभ्यः पिंडं० ॥१०॥ अग्निदग्धाश्च ये केचि
न्नाग्निदग्धास्तथापरे। विद्युच्चौरहताये च तेभ्यः पिंडं० ॥११॥ रौरवे चां
धतामिस्रे कालसूत्रे च ये गताः। तेषामुद्धरणार्थाय इमं पिंडं० ॥१२॥
असिपत्रवने घोरे कुंभीपाकेषु ये गताः। तेषामुद्धरणार्थाय० ॥१३॥ अ
नेकयातनासंस्थाये नीता यमकिंकरैः। तेषा० ॥१४॥ असंख्ययातना
संस्थाये नीता यमकिंकरैः। तेषा० ॥१५॥ पशुयोनिंगताये च पक्षिकीटसरीसृ
पाः। अथवा वृक्षयोनिस्था तेभ्यः पिंडं० ॥१६॥ अन्यैर्दुर्मरणैर्ये च ये हतास्तु 11

धयानृषां।भूतप्रेतपिशाचाश्चतेभ्यःपिंडं०दं।।१७।।नरकेषुसमस्तेषुया
तनाभिःप्रपीडिताः।तेषामु०दं।।१८।।दिव्यंतरिक्षभूतस्थाःपितरोबांध
वादयश्च।तेसर्वेतृप्तिमायांतुपिंडेनानेनसर्वदा।।१९।।जात्यंतरसह
स्राणिभ्रमंत्यस्वेनकर्मणा।मानुष्यंदुर्लभंतेषांतेभ्यःपिंडं०दं।।२०।।
येकेचित्प्रेतरूपेणवर्त्तंतेपितरोमम।तेसर्वेतृप्तिमायांतुपिंडे०नानेन
सर्वदा।।२१।।पिंडदानंकृत्वा।।अत्रपितरो०षतृ।।प्रत्यवनेजनं।।नाना
गोत्रेभ्यःनानाशर्मभ्यःअवनेनिग्ध्वं।।येचयुष्मानत्रातु।।नमोवःपिता०रो
अत्रवंदनादि।।अत्राछादन०निगोत्राः।।पितृ०सैकोदृष्टाःसपत्नीकाः
पुराणश्लोकोक्तसहिताःयथा२विभागंवःस्वधा।।अत्राछादन०स्त्र।।

अनेन पिंडदानेन ॥ नीलखुरे पिंडदानं परिपूर्णमस्तु ॥ सव्यं । आचमनं ॥
नमस्कारः ॥ उग्राङ्कितादिकं कृत्वा ॥ पूर्वोक्तिं० तिथौ ॥ पूर्वोक्तिं० देशे च ।
अमुकपर्वणि । अपसव्यं ॥ नीलोद्वाहकर्मणः सम्पूर्णार्थं यथासंपन्नेन० न
पंचाशत ब्राह्मणान् सदक्षिणान् गोत्राः पितृ० एकोद्दिष्टेन्द्रः पुराणश्रो
कसहिताः यथा ० विनागं वः स्वधा । गोदानसंकल्पः । अस्य नीलखुरे पिं
डदानकर्मणो० स्तु ॥ नडंकर्णीन्निरिति विसर्जनं । नीलोत्सर्गः ॥ आचम
नं प्राणायामः ॥ अद्येत्यादि० उत्सर्गमहं करिष्ये । उग्राङ्कितादिकं
कृत्वा ॥ पूर्वोक्तिं० देशे च ॥ वामदेवो वृषस्तर्यस्त्रिष्टुप् ॥ एतं युवानं १२
हा ॥ मातृपितृक्षयो हे देवब्राह्मणानां च संनिधौ इमं नीलं अर्थयं
पति वो ददामि तेन क्रीलं ति चरथ प्रियेण ॥ माव श्वानजनुषा सं विदा

नारायस्पोषेण मस्माकुद्दाधर स्वा

विचित्रवर्णैर्गंधपुष्पधूपाद्यैरर्चितं चक्रं त्रिशूलाभ्यामलंकृतं मधुपर्केण पू
जितं सारूप्यसायुज्यसान्निध्यसालोक्यचतुर्विधमुक्तिरूपाः गर्भधारण
योग्याः अस्पृष्टमैथुनाः यथोक्तलक्षणसंपन्नाः निःचतुर्विधमुक्तिरूपा
भिः सालंकृताभिः चतसृभिर्वत्सतरीभिः पितृश्रेयसे उपेक्षाकर्तृश्च य
से अमुकगोत्र अमुका अमुशर्मन्नृषास्तोकं० अहमुत्सृजामि। दक्षि
दक्षिणस्कंधप्रांचं उत्सृजति। ततः मयोऽर्वतो० इत्यनुवाकशेषेण
यथावःस्वसहाम्नतीत्येवमंतं सूक्तशेषं जपति। वरोः स्विष्टकृत् सप्त
कं स्त्रुच्यायां म० अग्नेर्वासोसि। तिस्रः समिधो जुहुयात्। यथोक्तं पर्य
क्षणं। इदमापइति त्र्यृचेन मार्जनं। पवित्रे अग्नौ प्रक्षिप्य। बर्हिर्होमः।

प्रणीताविमोकः॥ ब्रह्मणे पूर्णपात्रं॥ पूर्णया हं दीर्घमायुरस्तु० इत्यादिसम्
पूर्णथं कर्मांगदेवताप्रीत्यर्थं० ददे॥ ब्राह्मोऽसर्जनं॥ यथासंपन्नेनान्नेन० ब्रा
ह्मणशतपरिपूर्त्यै॥ भगवत्यः कर्मांगदेवताः प्रीयंतां॥ शं नः पंचोनाशां
तिः॥ त्रयो वै यज्ञेकामा० जपेत्॥ चतुर्भिश्च० नमः॥ प्रीयज्ञपुरुषायनमः॥
ददतो० आवाहनं० श्वरः॥ ततः कांस्यपात्रे सघृते सहिरण्ये यजमान
स्य मुखावलोकनं॥ आज्यं तेजः समुद्दिष्टं॰ आज्यं पापहरं परं॥ आ
ज्ये सुराणामाहारा आज्ये लोकाः प्रतिष्ठिताः॥ ब्राह्मणाय दद्यात्॥
मांगल्यं आशीर्वादः॥ ॥छ॥ ॥इति नीलपद्धतिः समाप्तः॥ ॥छ॥ १३
॥ ॥सं० १७५२ व० पोष वं० ३ शनौ लिखितमिदं॥ ॥
शुं

॥गयाशीर्षे विजानीयान्नीलस्य दक्षिणे खुरे। पार्वण ४ ततः समुच्चये
वाक्येन पिंडदानं प्रथमं पितृपार्वणं। द्वितीयं मातृपार्वणं। तृतीयं मा
तामहपार्वणं। चतुर्थं मातामहीपार्वणं ४। इत्यनुक्रमः॥ केचिद्द्वितीयं मा
तामहपार्वणं। तृतीयं मातृपार्वणं चैवं क्रमेण कारयंति मूढाः। शास्त्र
तात्पर्यं न जानंति तं गयाशीर्षे विजानीयादिति वचनमात्रेण भ्रांत
स्तीर्थे श्राद्धं तच्च मातरइति स्मृतेः। तीर्थश्राद्धमातृ समानीविधिं विकीर्षति
श्रेयं तु फलादि देश एवं न पुनः कर्मादि देश एवं इत्येवं गीर्वाणशास्त्रा
र्थं न जानाति तया कुर्वंति॥ तत्रापि तु मातृमातामह मातामही इत्येवं 14
क्रमः॥ ततः एकोद्दिष्टानि॥ ॥का॥ ॥श्री॥ ॥शुभं भवतु॥ ॥

नीलोद्वाहनोउपहार

नील्नोद्वाहनोउपहार

~~महा शु द्वी पांकर~~

महा शु द्वी पं ाशंकर तिथि

आशो शु द १ मा ऐकव्रज तिथी

महा शु द ३ बाइ गोगि तिथी

महा शु द ८ गंगा राम तिथि

भाद्र पद वद १३ वनराम तिथि